## गाधलवणयोः प्रमाणे । (४/३७३८)

प्रमाणवाचिनि तत्पुरुषे समासे गाध लवण इत्येतयोरुत्तरपदयोः पूर्वपदं प्रकृतिस्वरं भवति। [1]शम्बगाधमुदकम्। अरित्रगाधमुदकम्। तत्प्रमाणम् इत्यर्थः। गोलवणम्। अश्वलवणम्। यावद् गवे दीयते तावदित्यर्थः। षष्ठीसमासा एते। तत्र 'शमेर्बन्' (उ. ५४३) इति बन्प्रत्ययान्तत्वाच्छम्बशब्द आद्युदात्तः। अरित्रशब्दः अर्तिलूधूसू (३. २. १८४/३१६५) इति इत्रप्रत्ययान्तो मध्योदात्तः। गोशब्दो डोप्रत्ययान्तः (उ. २३५) अन्तोदात्तः। अश्वशब्दो 'अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्' (उ. १५७) इति क्वन्प्रत्ययान्तः आद्युदात्तः। प्रमाणम् इयत्ता–परिच्छेदमात्रमिह द्रष्टव्यं न पुनरायाम एव। स्वरव्यञ्जनं च प्रमाणविशेषविषयत्वमे[2]तेषाम्। प्रमाणे इति किम्? परमगाधम्। परमलवणम्॥

## दायाद्यं दायादे। (५/३७३९)

तत्पुरुषे समासे दायादशब्दे उत्तरपदे दायाद्यवाचि पूर्वपदं प्रकृतिस्वरं भवति। विद्यादायादः। धनदायादः। सञ्ज्ञायां समजनिषद (३. ३. ९९/३२७६) इति विद्याशब्दः [3]क्यप्प्रत्ययान्तः। उदात्तः इति च तत्र वर्तते, तेनाय–मन्तोदात्तः। 'कृपृवृजिमन्दिनिधाञ्भ्यः क्युः' (उ. २४८) इति बहुलवचनात् केवलादपि धाञः क्युः प्रत्ययः, तेन धनशब्दः प्रत्ययस्वरेण आद्युदात्तः। अथ विद्यादायादः इति केन षष्ठी? स्वामीरीश्वराधिपतिदायाद (२. ३. ३९/६३९) इति। यद्येवं 'प्रतिपदविधाना च षष्ठी न समस्यते' (वा. ८९) इति समासप्रतिषेधः प्राप्नोति? एवं तर्हि शेषलक्षणैवात्र षष्ठी, तस्यास्तु सप्तमी विधीयमाना बाधिका मा विज्ञायि इति पुनरभ्यनुज्ञायते। दायाद्यम् इति किम्? परमदायादः। [4]अत्र समासान्तोदात्तत्वमेव भवति॥

## प्रतिबन्धि चिरकृच्छ्रयोः। (६/३७४०)

तत्पुरुषे समासे चिरकृच्छ्रयोरुत्तरपदयोः प्रतिबन्धिवाचि पूर्वपदं प्रकृतिस्वरं भवति। गमनचिरम्। गमनकृच्छ्रम्। व्याहरणचिरम्। व्याहरणकृच्छ्रम्। गमनव्याहरणशब्दौ ल्युडन्तौ, तयोर्लित्स्वरः। गमनं च यच्चिरं च इति विशेषणसमासो[5]ऽयम्, मयूरव्यंसकादिर्वा[6] एष द्रष्टव्यः। गमनं हि कारणविकलतया [7]चिरकालभावि कृच्छ्रयोगि वा प्रतिबन्धि जायते। प्रतिबन्धि इति किम्? मूत्रकृच्छ्रम्॥

## पदेऽपदेशे। (७/३७४१)

अपदेशो व्याजः, तद्वाचिनि तत्पुरुषे समासे पदशब्दे उत्तरपदे पूर्वपदं प्रकृतिस्वरं भवति। मूत्रपदेन [8]प्रस्थितः। उच्चारपदेन प्रस्थितः। मूत्रशब्दः 'सिविमुच्योष्टेरू च' (उ. ६१२) इति ष्ट्रन्प्रत्ययान्तः, मूत्रयतेर्वा घञन्तः आद्युदात्तः। उच्चारशब्दोऽपि घञन्तः 'थाथघञ्क्ता[9]जबित्रकाणाम्' (६. २. १४४/३८७८) इत्यन्तोदात्तः। विशेषणसमासोऽयं मयूरव्यंसकादिर्वा। अपदेशे इति किम्? विष्णोः पदम् विष्णुपदम्॥

---

1. उदकम् नास्ति ग. 2. एषाम् फ. 3. क्यबन्तः ह. 4. अत्र नास्ति क. 5. अयं नास्ति क. फ. ह. 6. वेति वक्तव्यम् फ. 7. चिरकालस्य ब. फ. ह. 8. प्रस्थितम् ह. 9. जबित्रकाणाम् नास्ति फ.